Sanskritarticle.com

ISSN NO. 2454-9177

# National Journal of Hindi & Sanskrit Research

Volume 39 (November - December, 2021)

INDEX – Volume 39 (November-December, 2021)

National Journal of Hindi & Sanskrit Research


| | | |
|---|---|---|
| 21 | शरणदेवमते कर्मणि द्वितीयायाः प्रतिपादनम्<br>गोपेश कुमार शर्मा | 68-71 |
| 22 | संस्कृतभाषाधिगमे अभिप्रेरणकारकाणाम् उपयोगिता<br>Siddhartha Sankar Mondal | 72-73 |
| 23 | बौद्धकालीन वर्ण व्यवस्था, एक विवेचन<br>डॉ. (श्रीमती) सुषमा शुक्ला | 74-78 |
| 24 | हिंदी यात्रा साहित्य में प्राकृतिक परिवेश<br>शुभारानी. के | 79--81 |
| 25 | अभाव के स्वरूप का विश्लेषण<br>नारायण प्रासाद नौटियाल, डॉ. दयालसिंह | 82-88 |
| 26 | कृषिकर्मणि ज्योतिषः प्रभावः<br>Bhageerathee Patra, Laxman Majhi | 89-93 |
| 27 | आधुनिककाले अभिज्ञानशाकुन्तले स्त्रीविषयकसूक्तिनां द्वारा समाजोपयोगिता<br>Bilata Barman | 94-97 |
| 28 | महर्षिघेरण्डदिशा मुद्रायोगस्य स्वरूपफलविमर्शः<br>Dr. Swapan Mal | 98-102 |
| 29 | The Socio-Religious Concepts of Kālidāsa<br>Arpita Nath | 103-105 |
| 30 | पाणिनीयव्याकरणानुसारेण अन्योन्याश्रयदोषविमर्शः<br>Sumanta Bhaskar | 106-108 |
| 31 | रव्वा श्रीहरेः रचनालहरिः<br>Kurella. Ahalya | 109-112 |
| 32 | वैष्णववेदान्तेषु पदार्थविचारः<br>स्वामी शंकरानन्द | 113-116 |
| 33 | महाभारत में आदर्श राजनैतिक चिन्तन एवं वर्तमान राजनीति की दशा एवं दिशा<br>डॉ.राजेश मीना | 117-120 |
| 34 | **THOUGHTS OF YOGA IN *DEVI-BHĀGAVATAPURĀṆA***<br>Rasmita Maharna | 121-124 |
| 35 | काव्यप्रकाशस्य साहित्यदीपिकाटीका<br>Harapriya Hati | 125-128 |
| 36 | कथ्यभाषारूपेण संस्कृतस्य व्यवहारनिष्पादकत्वं पाणिनिरीत्या अनुशीलनम्<br>Pradip Mandal | 129-131 |
| 37 | पीठिका<br>डा. सिद्दप्प बसवन्तप्प करेप्पगोळ | 132-133 |
| 38 | संस्कृतवाङ्मये सम्प्रदायाः<br>चौगुले बाहुबली वसंत | 134-137 |
| 39 | गायत्र्याः स्वरूपम्<br>डां. खेमचन्दः | 138-139 |
| 40 | काव्यशास्त्ररचनायां नवदुर्गमण्डलस्य पण्डितानां योगदानम्<br>पायल महापात्रः | 140-142 |

National Journal of Hindi & Sanskrit Research

National Journal of
Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2021; 1(39): 140-142
© 2021 NJHSR
www.sanskritarticle.com

**पायल महापात्रः**
(शोधच्छात्रा),
राष्ट्रियसंस्कृतविश्वविद्यालयः,
तिरुपतिः

**Correspondence:**
पायल महापात्रः
(शोधच्छात्रा),
राष्ट्रियसंस्कृतविश्वविद्यालयः,
तिरुपतिः

# काव्यशास्त्ररचनायां नवदुर्गमण्डलस्य पण्डितानां योगदानम्

**पायल महापात्रः**

**उत्कलस्य परिचयः-** उत्कृष्टा कला यस्मिन् उत्कलमिति भारतवर्षेऽस्मिन् विधीयते। पवित्रे अस्मिन् देशे उत्कलराज्ये बहुनि पवित्रस्थानानि विद्यन्ते। चतुर्धामेषु पुरीनगरस्य वैशिष्ट्यं पुराणे वर्णितं दृश्यते। साहित्यदर्पणे कलिङ्गाः साहसिका इति उदाहरणं तस्य वैशिष्ट्यं प्रतिपाद्यते। भूमिरियं न केवलं साहित्यिकानां अपि च वीरत्यागीसेवकानां भूखण्ड इति सर्वविदितोऽस्ति।

संस्कृतसाहित्यस्य प्रचारे प्रसारे चास्य भूखण्डस्य अनेकाः पुत्राः स्वपाण्डित्यं प्रदर्शयन्ति। जयदेवस्य गीतगोविन्दं समग्रे प्रपञ्चे विख्यातः जातोऽस्ति। भगवतः श्रीकृष्णस्य भगवत्याः राधिकायाः शृङ्गारप्रेमवर्णनं प्रथमतया लौकिककाव्ये कृत्वा प्रसिद्धिमवाप।
उत्कलीयानां संस्कृतसाहित्यं प्रति अवदानं निरवधिः वर्तते। आधुनिकसमयेऽपि बहूनां संस्कृतपण्डितानां योगदानं वरीवर्तते।

**नवदुर्गमण्डलस्य परिचयः-** भारतवर्षस्य पुरुषोत्तमक्षेत्रम् इति नाम्ना प्रसिद्धः ओडिशाराज्यं संस्कृतसाहित्यं प्रति महद्वैशिष्ट्यं स्थापयति। ओडिशायाः प्राक्तनं नाम उत्कलप्रदेश इति प्रसिद्धः। अस्मिन् ओडिशाप्रदेशे नवदुर्गमण्डलस्य विशिष्टस्थानं वर्तते। ओडिशायाः इतिहासं यदि अन्विष्यामः तर्हि ज्ञायते १९९२ संवत्सरपर्यन्तं नवदुर्गमण्डलं पुरीनगरस्य अधीने आसीत्। अनन्तरकाले अववर्धितां जनसंख्यां दृष्ट्वा पुरीमण्डलं पुरी-खोर्धा-नयागड इति त्रिधा विभक्तम् अस्ति। नयागडस्य संस्कृतनाम नवदुर्गमण्डलमिति प्रसिद्धम्। प्राक्तनराज्यशासनकाले अनेके राजानः नयागडमण्डलस्य शासनभारं गृहीतवन्तः। तेषां राजपरिषदि अनेके संस्कृतविद्वांसः परामर्शदातारः आसन्। नयागडमण्डलस्य शासनं नयागडः, खण्डापडागडः, रणपुरश्चेति त्रिषु राजवंशेषु परिचालितम् अस्ति। यतः नयागडः, खण्डपडागडः, तथा रणपुरगडः एकैकः लघुप्रदेशः आसीत्। तदानीन्तनकाले गडः नाम प्रदेशः (State) इति नाम्ना व्यवह्रीयते स्म। एतेषां राजपरिवाराणां परामर्शदातारः ये संस्कृतविद्वांसः आसन् ते बहूनि काव्यानि विरचितवन्तः।

**नवदुर्गण्डलस्य पण्डितानां योगदानम्-** अस्मिन् नयागडमण्डले अनेके संस्कृतपण्डिताः आसन् येषां संस्कृतसाहित्यं प्रति महत्वपूर्णं योगदानम् अस्ति। तेषां परिचयः तथा योगदानविषये अधः विवरणं प्रदीयते।

१) **चन्द्रशेखरसिंहसामन्तमहोदयः-** "सिद्धान्तदर्पणः" इति प्रसिद्धग्रन्थस्य कर्ता महामहोपाध्यायसामन्तचन्द्रशेखरसिंहहरिचन्द्रमहापात्रः अन्यतमः। स पञ्चत्रिंशदुत्तराष्टादशशततमे (१८३५)

ख्रीष्टाब्दे डिसेम्बरमासस्य चतुर्विंशतितमे (२४) दिनाङ्के जातः। अयं कविः विभिन्नानां छन्दसाम्, गुणानाम्, अलङ्काराणां च प्रयोगं कृत्वा सामन्तचन्द्रशेखरः सिद्धान्तदर्पणग्रन्थं विरचितवान्।

चन्द्रशेखरमहोदयेन १८७६ ख्रीष्टाब्दे "हरिचन्द्रमहापात्र" इति उपाधिना विभुषितः अभवत्। १८९३ ख्रीष्टाब्दे सेप्टेम्बरमासस्य अष्टविंशतितमे (२८) दिनाङ्के "महामहोपाध्याय" इति उपाधिना भूषितः अभवत्। राधानाथरायमतानुसारं "भारतस्य द्वितीय भास्कर" इति नाम्ना ख्यातः आसीत्। ते "सिद्धान्तदर्पणः" (मूलग्रन्थः), दर्पणसारः (लघुग्रन्थः उत्कलभाषायाम्), दर्शदीपिका (षोडशश्लोकात्मकः संस्कृतग्रन्थः) इत्यादीन् ग्रन्थान् रचितवन्तः। सिद्धान्तदर्पणनामको ग्रन्थः सिद्धान्तपरम्परायां प्रायः अन्तिमसिद्धान्तग्रन्थः। ग्रन्थे पूर्वाह्नोत्तराह्नौ इति द्वौ भागौ भवतः। पूर्वाह्ने कालपरिमाणम्, अहर्गणानयनम्, ग्रहभराणमानम्, ग्रहानयनम्, उत्तराह्ने विभिन्नप्रश्नाः, नानामतानां चर्चा, सृष्ट्युत्पत्तिः, पृथिव्यादिपिण्डानां कक्षामानम्, गोलादियन्त्रनिर्माणप्रक्रिया जगन्नाथस्तुतिः वर्णिता। अयं यद्यपि एकः वैज्ञानिकतत्वपूर्णः ग्रन्थः अस्ति तथापि अस्य रचनासु उत्कृष्टं साहित्यं स्पष्टतया दरीदृश्यते।

२) **किशोरकरमहोदयः-** ओडगां नयागड मध्यवर्ती शरणकूलः अस्ति। शरणकूलस्य सन्निकटे भिकारीपडाग्रामे मान्याः किशोरकरमहोदयाः अपि संस्कृतस्य विद्वांसः आसन्। एते मान्याः स्वामीदयानन्दस्य आर्यसमाजस्य अनुयायी सन्ति। आर्यसमाजस्य विषयानाम् उपरि एतेषां बहु आग्रहः अस्ति। बुद्धचरितम्, दयानन्दशतकम्, चार्वाकदर्शनम् इति काव्यानि रचितवन्तः।

३) **प्रो.गोदावरीशमिश्रः-** नयागडस्य कुरालग्रामे बहवः संस्कृतविद्वांसः सन्ति। तत्र प्रो. गोदावरीशमिश्रमहोदयाः अन्यतमः। स दर्शनशास्त्रे धूरिणाः, तस्य परिवारः संस्कृतपरिवारः। तस्य भ्राता देवीप्रसादमिश्रः अपि संस्कृतविशारदः। प्रो गोदावरीशमिश्रमहोदयाः माद्रासविश्वविद्यालये दर्शनविभागे आचार्यरूपेण कार्यं कृतवन्तः। अनन्तरम् ICPR (Indian council of Philosophical Research, New Delhi) इत्यत्रापि अधीकारीरूपेण कार्यं कृतवन्तः। दर्शनविषये बहूनि पुस्तकानि ते विरचितवन्तः।

४) **हरेकृष्णदासमहोदयः-**१८६७ कुमारपूर्णिमातिथिः, १९५० मार्गशिरकृष्णपक्षे एकादशीतिथौ इहलिला त्याग...। पठाणिसामन्तस्य प्रियः शिष्यः आसीत्। खण्डपडाग्रामे विशेषपरिचितिरपि आसीत्। यदा खण्डपडा राजा हरिहरसिंहः युवराजरूपेण प्रथमे कार्यभारं गृहीतवन्तः तदा स राजकविः एवं राजज्योतिषविभागे हरेकृष्णदासः राजनगरे नियुक्तिः कृतः। स बहु वन्दना, जणाण, षोडशमालिका, कलासङ्गीत, भजन, रसपञ्चक इत्यादीन् रचितवन्तः। संस्कृतसाहित्यं प्रति तेषाम् अवदानम् अस्ति परन्तु लोकलोचनं प्रति नायाति।

५) **प्रो.गोपवन्धुमिश्रः-** साहित्यजगति कविगणेषु कविवरः गोपवन्धुमिश्र अन्यतमः कविः वर्तते। आङ्गल अक्तोवरमासि त्रयोदशदिनाङ्के १९५९ तमे संवत्सरे नयागडनगरे (विरुडा) ओडिशाराज्ये अयं कविः जन्मग्रहणं कृतवान्। संस्कृतकाव्यवाङ्मये आचार्यः गोपवन्धुमिश्रः एकः लब्धप्रतिष्ठ व्यक्तिविशेषः। आचार्यवरः नैकाग्रन्थान् विरच्य विदुषां प्रशंसाभाक् वर्तते। संस्कृते बहूनि काव्यानि लिखित्वा कविः संस्कृतजगति देदीप्यमानः अस्ति।

कविः संस्कृतभारत्याः सेवायां बहूनां ग्रन्थानां स्वप्रतिभया रचयित्वा अनेकराष्ट्रीयान्तराष्ट्रीयं सम्मानं तथा पुरस्कारान् प्राप्तवान्।

६) **पण्डितवनमालि आचार्यः-** विंशशतकस्य प्रथमचरणे जन्मलब्धा पं वनमालि आचार्यः संस्कृतसाहित्यस्य समृद्धये विशेषप्रयत्नं कृतवान्। अयं तदानीन्तनखण्डपडाप्रदेशस्य एकः विशिष्टसाहित्यिकः आसीत्। तस्य काव्यानि पाण्डित्यपूर्णानि आसन्। एकमुदाहरणं यथा-

**"यूनतस्य समागतः खलु यताकालं विवाहोत्सव-**
**स्तत्राहीद् गजवाजिराजि-चरणाघातोत्थितैर्रेणुभिः॥"**
**भेरी-शङ्ख-मृदङ्ग-काहल-वृहत्तूर्यादि-वाद्यस्वनैः**
**दोलावाहक-गोप-सुप्रवचनैः पूर्णं नभोमण्डलम्॥**

७) **पण्डितचन्द्रशेखरमिश्रः-** पण्डितचन्द्रशेखरमिश्रः नवदुर्ग-मण्डलस्य अपर एकः विद्वान् अस्ति यः "ब्रिटिश् वंशानुचरितम्" इति काव्यं विरच्य तदानीन्तनमितिहासं वर्णितवान्। अयं कविवरः विभिन्नविद्यालयेषु अध्यापनं कृत्वा संस्कृतमातुः सेवां कृतवान्।

८) **धनेश्वराचार्यमहोदयः-** नवदुर्गमण्डलस्य अन्तर्गते कण्टावणिआ इति ग्रामे धनेश्वराचार्यः, एते तु विद्वांसः जन्मलब्धा संस्कृतसाहित्यं प्रति महद्वैशिष्ट्यं स्थापयति। स पौरहित्यकर्माणि कर्मकाण्डकर्माणि अपि धुरिणाः, एतेषां कृतिः

अस्ति यथा- व्याकरणनिधिः, दक्षिणकालिकास्तुतिम्, स्वतन्त्रसंसारम्, गङ्गापारम्, मयुराप्रदेशः, कविताकल्पलता, दर्शनसारः, इत्यादि पुस्तकानि रचितानि। भाषाप्रयोगः, भाषासौष्ठवम्, भाषाशैली च हृदयग्राहिणी आकर्षका उपयुक्ता समीचीना विद्यते।

९) **गवेषकः नारायणमहापात्रः-** संस्कृतसाहित्यं प्रति ये कतिपये महाकवयस्तेषामन्यतमः श्रीमान् नारायणमहापात्रः अन्यतमं स्थानं धत्ते। पुरातनसंस्कृतकाव्यकवितां आधारीकृत्य संस्कृते तथा ओडिआभाषायाम् अनुवादं कर्तुं डा. नारायाणमहापात्रस्य संस्कृतभाषायाः उपरि प्रतिभापूर्णमाधिपत्यमासीत्। कालिदासेन विरचितान् "श्रुतवोधः", "जगन्नाथस्तोत्ररत्नमाला", "कविचिन्तामणि" इति ग्रन्थान् साधारणबोधगम्यनिमित्तं स सरलसंस्कृतेन अनुवादं कृत्वा अत्यधिकं लोकप्रियतां प्राप्तवान्। महोदयस्य भाषा सरला-तरला-स्वाभाविकी चास्ति। रचनाशैलीमाध्यमेन चरित्रचित्रणं कथोपकथनं रससंयोजनं भाषाशैली च हृदयग्राहिणी आकर्षका उपयुक्ता समीचीना विद्यते।

## सहायकग्रन्थसूची

१) Contemporarcey Sanskrit writings in Orissa, Prathiba prakashan, 2006.

२) सिद्धान्तदर्पणः।